श्रीमच्छंकरभगवत्पादविरचिता

# सौन्दर्यलहरी

# SAUNDARYALAHARI

OF

SRI SHANKARA BHAGAVATPADACHARYA

WITH COMMENTRIES (IN SANSKRIT)

EDITOR

**A. KUPPUSWAMI**

राष्ट्रिय-संस्कृत-संस्थान

मानित विश्वविद्यालय, नई दिल्ली

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्।

श्रीमच्छंकरभगवत्पादविरचिता

# सौन्दर्यलहरी

लक्ष्मीधरा–सौभाग्यवर्धनी–अरुणामोदिनी–आनन्दगिरीया–तात्पर्यदीपिनी–
पदार्थचन्द्रिका–डिण्डिमभाष्य–गोपालसुन्दरी–आनन्दलहरी–कैवल्यवर्धनी
आंग्लानुवाद, टिप्पणी, प्रयोगयन्त्र तथा पूजा विधि सहित

# SAUNDARYALAHARI

OF

SRI SHANKARA BHAGAVATPADACHARYA

WITH COMMENTRIES (IN SANSKRIT)

LAKSHMIDHARA, SAUBHAGYAVARDHANI, ARUNAMODINI, ANANDAGIRIYA, TATPARYADIPINI, PADARTHACHANDRIKA, DINDIMABHASHYA, GOPALASUNDARI, ANANDALAHARI AND KAIVALYAVARDHANI, ENGLISH TRANSLATION AND NOTES, PRAYOGA, YANTRAS AND ILLUSTRATIONS.

EDITOR

**A. KUPPUSWAMI**

राष्ट्रिय-संस्कृत-संस्थान

मानित विश्वविद्यालय

५६-५७, इन्स्टीट्यूशनल एरिया,

जनक पुरी, नई दिल्ली-११००५८

॥ श्रीः ॥

# ॥ श्रीविद्या सौन्दर्यलहरी च ॥

सन्तु विद्या जगत्यस्मिन् संसारभ्रमहेतवः ।
भजेऽहं तां यया विद्वान् विद्ययाऽमृतमश्नुते ॥

—त्रिपुरसुन्दरीवेदपादस्तवे श्रीमच्छंकरभगवत्पादाः

विद्या हि सा या वेद्यमवगमयति । तदानीं सा वेत्तुः साधनकोट्यन्तर्गता । तस्य सा क्रियोपयोगिनी, यया कार्यमन्यद्विद्यते । ज्ञाते वेद्ये सा विद्या वेद्यकोटावन्तर्भवति, तदनन्यतया । सिद्धा सा त्रिपुटीं विजहाति, वेद्य-वेत्तृ-विद्यारूपाम् । "आत्मविद्या महाविद्या श्रीविद्या कामसेविता" इति विद्यात्वेन स्तूयते परा भट्टारिका, वशिन्यादिभिः वागीश्वरीभिः श्रीललितासहस्रनामस्तवे । सा देवी विद्या, तया वेद्या च ।

यदा सा विद्या वेद्यमन्यं वेदयति, तदा प्रपञ्चात्मिकायास्तस्या भानं; तदा तस्याः साधनता; अपरेति च तस्या नाम । विद्यैव वेद्यतया भातीति, वेद्यमेव विद्यात्वेनावतीर्य साधकाननुगृह्णातीति च यदा वेदयति स्वात्मानमेव, तदा ब्रह्मभानं; वेद्यान्तरविगलनेन वेद्यवेत्तृवेदनभेदलयश्च, तदा परेति नाम; यां श्रीविद्या, ब्रह्मविद्या, महाविद्या इत्यादिभिर्बहुभिर्नामभिर्व्यवहरन्ति ।

श्रीविद्या हि पञ्चदशी षोडशीत्यादिनामभिः मन्त्राध्वनि प्रसिद्धा, बीजाक्षरसमुच्चयरूपा मूलमन्त्रात्मिका, पराभट्टारिकाया उपास्तौ अङ्गभूता चकास्ति । गुरोः सकाशात् प्राप्या, अक्षरजपरूपक्रियानिर्वर्त्या, साधकेन विविधैर्जपप्रकारैः पुरश्चरणप्रकारैश्च संस्कार्या, क्रमेण बहुविधाः सिद्धिदशाः लभमाना विकार्या चानुभूयते । सिद्धा सैव, आत्मनोऽनन्यां परां देवतामवगमयति । तदा सा परादेवता पराभट्टारिका स्वरूपभूता, क्रियाद्यनिर्वर्त्या सर्वगा नित्या अपरिच्छेद्या मूलप्रकृतेरपि परा, अविकारिणी । सैव स्वेच्छया प्रपञ्चसृष्ट्यादौ प्रभवन्ती, पराशक्तिः, शब्दब्रह्म, स्रष्ट्री, गोप्त्री, संहर्त्रीत्यादिकं औपाधिकं नामजातं भजते । सैव निर्विकल्पा निराधारा निर्भेदा निर्गुणा निष्कला नीरूपेत्यादिभिर्नामभिः नञा निरूपितं परं ब्रह्म । अतः श्रीविद्यामेव ब्रह्मविद्यामाहुः । ब्रह्म वेत्ति ब्रह्म भवतीत्यनुशासनम् ।

श्रीविद्याख्यमन्त्राधीनं हि श्रीमातुः भानम् । तच्च श्रीमातुरनुग्रहादेव लभ्यम् । "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वां" इत्यौपनिषदः निर्देशः । उपास्या, उपास्तिः, तदङ्गभूता श्रीविद्येति त्रयाणां सामरस्यमनुभवति साधकः ।

# सौन्दर्यलहरी सव्याख्या ।

## प्रथमभागस्य विषयसूचिका


| श्लोकसंख्या | विषयः | पृष्ठसंख्या |
| --- | --- | --- |
| १ | मङ्गलाशासनं, शक्त्युत्कर्षप्रपञ्चः, शिवस्य शक्तियुक्तस्यैव जगत्कर्तृत्वादिषु प्रभुता, बहुजन्मार्जितपुण्यानामेव स्तवे प्रणामे वाऽधिकारः, शिवशब्दनिर्वचनं, मातृकाविद्याप्रासादानुत्तरावाग्वादिनीशिवपञ्चाक्षरीपाशादित्र्यक्षरीमन्त्रोद्धारः, परशिवोपास्तेर्मुख्यता, शिवशब्दस्य माङ्गलिकता, ध्वनिरसप्रधानत्वं काव्यस्य, देव्या अखिलोपास्यत्वं, शिवशक्तिपदनिर्वचनं, जगन्निर्मातृत्वविचारः, हादिविद्यापञ्चाक्षर्युद्धारः, शक्तिशक्तिमतोरभेदभावना, रहस्यार्थः, मातृकाश्रीचक्रपरत्वेन व्याख्या, मीमांसकमतनिरसनं, श्रीविद्यामन्त्रोद्धारः । | १ |
| २ | ब्रह्मादीनां सृष्ट्यादिकर्तृत्वं भगवतीपादाब्जरेण्वायत्तं, रहस्यार्थः । | ५१ |
| ३ | अज्ञानावरणजाड्यदारिद्र्यनिरसने संसारसागरोत्तारणे देवीपदपांसोः साहाय्यप्रार्थना, कामराजमातृका-वाग्भवबीज-रहस्यार्थ-षट्कूटवैष्णवीमन्त्रोद्धारः । | ५९ |
| ४ | भयात्त्राणं वाञ्छाधिकदानं देवीपादायत्तम्, तत्तद्देवतारूपेण देव्येव फलदात्री । | ६७ |
| ५ | विष्णोर्मोहिनीत्वे शिवमोहकत्वं, कामस्य मुनिमोहकत्वं च देव्याराधनेन । षट्कूटवैष्णवीकामकलाप्रथमचक्रेश्वरीस्वरूपम् । | ७३ |
| ६ | साधनविरहेऽपि देव्यपाङ्गमहिम्ना मदनस्य जगज्जेतृता, सर्वाशापूरकचक्रेश्वरीमन्त्रोद्धारः । | ८० |
| ७ | देव्याः स्थूलध्यानं, चतुर्विधैक्यानुसन्धानं, सर्वसंक्षोभिणीचक्रेशीमन्त्रोद्धारः, सर्वध्यातव्यमूर्तिषु मुख्यं स्वरूपम् । | ८५ |
| ८ | समयिनां पराध्यानं, दहराकाशबाह्याकाशवियच्चक्रपूजा, ध्येयस्थानं, ध्येयप्रणाली, अध्यात्मसेवनप्रकारः, चतुश्चत्वारिंशन्मन्दिरमन्त्राः, श्रीचक्रेऽन्वयः । | ९३ |
| ९ | कुण्डलिनीरूपिण्या देव्या ध्यानं, षट्चक्रोपरि शिवयोर्विहारः, सूक्ष्मध्यानं, सादाख्यं पञ्चविंशं तत्वं, शक्तिशिवयोरैक्यं, भूमिकाः, षट्चक्रभेदः, मन्त्रावरणपूजारूपोऽन्तर्यागः । | १०० |
| १० | भगवतीचरणामृतेन प्रपञ्चमाप्लाव्य कुण्डलिन्याः पुनः कुण्डे स्वापः, तत्र श्रुतिवाक्ययोगशास्त्रसमन्वयः । | ११० |

परमेश्वरि । त्रिकोणं मञ्चरूपं तु बिन्दुकं च सदाशिवः ॥'' इति वचनादर्थो वा । अथ च सुधासिन्धुरासवसमूहः सुरविटपिकुलवृक्षः भूषारूपो मणिरेव द्वीपो यत्र नीपोपवनः । चिन्तैव मणिर्यस्मात् तादृशे गृहे अवलरूपे, शिवाकारे वराङ्गरूपे, परमशिवो बिन्दुः, चिदानन्दलहरीं सर्वेषामानन्दानामित्यादि श्रुत्युक्तरूपामित्यर्थः । पर्यालोचनया पञ्चमयागोऽन्यत्र सूचितः । कीदृशीं चिदानन्दलहरीं विज्ञानसुखतरङ्गात्मिकामित्यर्थः । शिव एकारस्तेन त्रिकोणं परमशिवो बिन्दुः । श्रीचक्रान्तर्गतत्रिकोणमध्यनिलयामित्यर्थ इत्यपि वदन्ति ।

**विष्णुपक्षे**—नीपोपवनवति बृन्दावनेऽपि तत्सत्त्वात् सौन्दर्यातिशयने शिवमप्याकारयतीति, शिवाकारे कल्याणरूपे वा मञ्चे खट्वायां, हे परमशिव परमकल्याणस्वरूप! पर्यङ्कनिलयां चिदानन्दलहरीरूपां त्वां कतिचन पुरुषा भजन्तीत्यर्थः ॥ ८ ॥

## आनन्दलहरीटीका

विशेषान्तरमप्याह—**सुधेति** । सुधासिन्धोः अमृतसमुद्रस्य मध्ये, सुरविटपिनां देववृक्षाणां या वाटी, तया परि सर्वतो वृते मणिद्वीपे जलमध्यस्थतटप्रदेशे नीपानां कदम्बानामुपवनं आरामः क्रीडावनं तद्वति, चिन्तामणिरूपरत्ननिर्मिते गृहे मञ्चे खट्वायां, कीदृशे? शिवानां ब्रह्मविष्णुरुद्रेश्वराणामाकारा मूर्तयः, पादचतुष्टयरूपेण वर्तन्ते यत्र, तादृशे । परमशिवः सदाशिव एव पर्यङ्कः पादचतुष्टयोपरिस्थितफलकरूपः, तत्र निलय आसनं यस्याः सा तथा, ताम् । तदुक्तं तन्त्रे—" ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः । एते पञ्च महाप्रेताः '' । महाप्रेतत्वं नाम महावीरत्वम् । प्रेताः प्रकर्षेण इताः देवीशरीरसंसर्गातिशयं प्राप्ताः । भट्टारिकया देव्या कामेश्वरांगेन संगः । कामेश्वरस्य शिवेन संगः, सदाशिवस्य मञ्चस्थमध्यफलकतां प्राप्तस्य, मञ्चेषु खट्वापादमूले व्यवस्थिता इति । पुनः कीदृशीं—चिदानन्दलहरीं ज्ञानसुखयोस्तरङ्गाकृतिम् । अथवा सकलश्रीविद्यामन्त्रनिदानभूतकामेशीबीजस्वरूपां च । चिदानन्दपदेन कामपरेण ककारो लभ्यते । अन्यवर्णानां स्वरूपपरिग्रहः । तदुक्तं ज्ञानार्णवे—" सकला भुवनेशानी कामेशीबीजमुद्धृतम् । अनेन सकला विद्याः कथयामि वरानने '' इति । कतिचन अनिर्वचनीया धन्याः । त्वत्कृपया श्लाघनीयाः एतादृशीं त्वां भजन्तीत्यन्वयः ॥ ८ ॥

## कैवल्यवर्धनी

ध्यानस्थलमाह—**सुधासिन्धोरिति** । अमृताब्धिमध्ये कल्पवृक्षवाटीपरिवृते कदम्बोपवनवति नवरत्नद्वीपे चिन्तामणिमये गृहे शिवाकारे मञ्चे पञ्चप्रेतासने परमशिवः कामेश्वरः तस्य पर्यङ्क उत्सङ्गः, तन्निलयां त्वां धन्याः कतिचन भजन्ति । परमपुरुषार्थरूपतामाह—चिदानन्दलहरीमिति । चित् चैतन्यं विश्वप्रकाशः, आनन्दः सुखं ते लहर्याविव